# শ্রীগণেশাষ্টকম্

{॥ শ্রীগণেশাষ্টকম্ ॥}

শ্রী গণেশায় নমঃ ।

সর্বে উচুঃ ।

যতোঽনংতশক্তেরনংতাশ্চ জীবা যতো নির্গুণাদপ্রমেযা গুণাস্তে ।

যতো ভাতি সর্বং ত্রিধা ভেদভিন্নং সদা তং গণেশং নমামো ভজামঃ ॥ ১॥

যতশ্চাবিরাসীজ্জগৎসর্বমেতত্তথাঽব্জাসনো বিশ্বগো বিশ্বগোপ্তা ।

তথেংদ্রাদযো দেবসংঘা মনুষ্যাঃ সদা তং গণেশং নমামো ভজামঃ ॥ ২॥

যতো বহ্নিভানূ ভবো ভূর্জলং চ যতঃ সাগরাশ্চংদ্রমা ব্যোম বাযুঃ ।

যতঃ স্থাবরা জংগমা বৃক্ষসংঘা সদা তং গণেশং নমামো ভজামঃ ॥ ৩॥

যতো দানবাঃ কিন্নরা যক্ষসংঘা যতশ্চারণা বারণাঃ শ্বাপদাশ্চ ।

যতঃ পক্ষিকীটা যতো বীরূধশ্চ সদা তং গণেশং নমামো ভজামঃ ॥ ৪॥

যতো বুদ্ধিরজ্ঞাননাশো মুমুক্ষোর্যতঃ সম্পদো ভক্তসংতোষিকাঃ স্যুঃ ।

যতো বিঘ্ননাশো যতঃ কার্যসিদ্ধিঃ সদা তং গণেশং নমামো ভজামঃ ॥ ৫॥

যতঃ পুত্রসম্পদ্যতো বাংছিতার্থো যতোঽভক্তবিঘ্নাস্তথাঽনেকরূপাঃ ।

যতঃ শোকমোহৌ যতঃ কাম এব সদা তং গণেশং নমামো ভজামঃ ॥ ৬॥

যতোঽনংতশক্তিঃ স শেষো বভূব ধরাধারণেঽনেকরূপে চ শক্তঃ ।

যতোঽনেকধা স্বর্গলোকা হি নানা সদা তং গণেশং নমামো ভজামঃ ॥ ৭॥

যতো বেদবাচো বিকুংঠা মনোভিঃ সদা নেতি নেতীতি যত্তা গৃণন্তি ।

পরব্রহ্মরূপং চিদানংদভূতং সদা তং গণেশং নমামো ভজামঃ ॥ ৮॥

শ্রীগণেশ উবাচ ।

পুনরূচে গণাধীশঃ স্তোত্রমেতৎপঠেন্নরঃ ।

ত্রিসংধ্যং ত্রিদিনং তস্য সর্বং কার্যং ভবিষ্যতি ॥ ৯॥

যো জপেদষ্টদিবসং শ্লোকাষ্টকমিদং শুভম্ ।

অষ্টবারং চতুর্থ্যাং তু সোঽষ্টসিদ্ধিরবানপ্নুযাত্ ॥ ১০॥

যঃ পঠেন্মাসমাত্রং তু দশবারং দিনে দিনে ।

স মোচযেদ্বন্ধগতং রাজবধ্যং ন সংশযঃ ॥ ১১॥

বিদ্যাকামো লভেদ্বিদ্যাং পুত্রার্থী পুত্রমাপ্নুযাত্ ।

বাংছিতাংল্লভতে সর্বানেকবিংশতিবারতঃ ॥ ১২॥

যো জপেৎপরযা ভক্ত্যা গজাননপরো নরঃ ।

এবমুক্ত্বা ততো দেবশ্চাংতর্ধানং গতঃ প্রভুঃ ॥ ১৩॥

ইতি শ্রীগণেশপুরাণে উপাসনাখংডে শ্রীগণেশাষ্টকং সম্পূর্ণম্ ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)

Amith K Nagaraj (amithkn@rediffmail.com)

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Ganesha Ashtakam Lyrics in Bengali PDF
% File name : gaNeshAShTakam.itx
% Category : aShTaka
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.webdunia.com
% Proofread by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)
% Description-comments : gaNeshapurANe
% Latest update : March 9, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website